Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 1 | ISSN : 2581- 6306

# वैष्णवरामदासविरचितगोपालदासचरितकाव्ये लोकोपकाराणि सुभाषितानि।

**पातकोटिसुब्बाराव**
शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**सारांशः**- कवेः कर्म काव्यम्', अर्थात् कवेः सारस्वतसृष्टिः काव्यम् भवति। कविः स्वीयनैसर्गिकप्रतिभया यत्किमपि पश्यति तत्सर्वं दृष्ट्वा अनुभवञ्च कृत्वा सामाजिकं सांस्कृतिकं सत्साहित्यं संरचयितुं सततं प्रयत्नशीलो भवति। पुनश्च सामाजिकभावानां सामाजिकविचाराणां च अभिव्यक्तये साहित्यं समाजस्य दर्पणोऽस्ति इत्युच्यते। तत्साहित्येषु च वैष्णवरामदासेन विरचितं गोपालदासचरितकाव्यमन्यतमं वर्तते। अत्र च समाजहितकारकाणि नैकानि सुभाषितानि वर्तन्ते। तदेव मया शोधलेखरूपेण संक्षेपेण प्रस्तूयते।

**मुख्यशब्दः**– कविः, शब्दब्रह्मणः, गोपालदासचरितकाव्यम्, काव्यम्, वैष्णवरामदासः, सुभाषितानि ।

सर्वं जगदिदं परब्रह्मणो विवर्तरूपमिति महर्षीणां मतम्। शब्दब्रह्मण उपासनेन परं ब्रह्म अधिगन्तुं शक्यते इति महर्षिवचनम्।

**द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म तथापरम्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**[1]

एवं विधस्य शब्दब्रह्मणः उपासनप्रकारः बहुधा वर्तते। शब्दब्रह्मणः आदिस्वरूपम् ॐकारः। ततो वेदाः महर्षिभिः दृष्टाः किन्तु वेदाध्ययने सर्वेषाम् अधिकारः कालान्तरे लुप्तः। ततः मन्दाधिकारिणां हितार्थाय महर्षिभिः पुराणानि रचितानि। अष्टादशसंख्यायुतानि, चतुर्लक्षश्लोकात्मकानि पुराणानि अधिगन्तुं सर्वे शक्ताः न भवन्ति इति ऋषितुल्याः महाकवयः काव्यानि निर्ममिरे कि बहुना एतद् क्रमम् अनपेक्ष्याऽपि 'श्रीमद्रामायणं 'लौकिकवाङ्मये आदिकाव्यं वेदानन्तरं मुनिना वाल्मीकिना रचितम्। ततः कालिदासादयः प्रसिद्धाः एव। वाङ्मयस्य प्रयोजनेषु उपदेशः मुख्यतमः। वेदकृतः उपदेशः प्रभोः आज्ञा इव लघयितुम् अशक्या, अकरणे च प्रत्यवायः दृष्टः। पुराणेषु दृष्टः उपदेशः सुहृदुपदेश इव मैत्रीपूर्वकः। तदाचरणे श्रोतुः स्वेच्छा भवति। एवं सत्कार्यानुष्ठाने कामचारित्वं माभूदिति काव्यानि कान्तासम्मितानि कविभिः रचितानि। यथा काचन प्रियतमा अनुनयालापैः प्रियम् अभिमुखीकृत्य रामादिवत् वर्तितव्यं न रावणादिवदिति उपदिशति अतः वेदपुराणेभ्यः अपि काव्यकृतोपदेशः आदरणीयः इति आलङ्कारिकाः स्पष्टम् ऊचुः।

सु इति उपसर्गात् भाष वक्तायां वाचि इत्यस्मात् धातोः क्त प्रत्ययेन निष्पन्नोऽयं सुभाषितम् इति शब्दः। सुन्दरवचनं ,मधुरवचनं च तदर्थो। संस्कृतसाहित्ये नैकानि सुभाषितानि वर्तन्ते। येषाम् अध्ययनेन मानवाः आदर्शमार्गजीवनं, धार्मिकजीवनं, उत्तमजीवनं च यापयन्ति। लोकोपकाराय, लोककल्याणाय जनान् प्रेरयन्ति सुभाषितानि।

## ❖ गोपालचिरतकाव्ये सुभाषितानि

### ✓ सज्जनानां महत्त्वम्-

[1] म.भा., शा.प., अ .232, श्लो . 30

समाजः जीवबद्धः इत्युच्यते। समाजे च समये समये बहवः आपदाः आगच्छन्ति। ताश्च समाजे कुप्रभावं जनयन्ति। तमेव प्रभावं निराकर्तुं मध्ये मध्ये सज्जनाः आविर्भवन्ति।

महात्मा पुरुषः स्वेच्छया जीवोद्धराय स्वशरीरं धृत्वा समाजे निस्वार्थभावेन वासं करोति। तेन परोपकाररूपपुण्येन ते परमपदम् अवाप्नुवन्ति। परमपदस्य अर्थः अस्माभिः मोक्षत्वेन स्वीकर्तुं शक्यते। यतो हि अस्मिन्नेव काव्ये कविना प्रोक्तम्–

**सन्तो यथेष्टं भुवि जीव जातेः सन्तारणायैव धरन्ति देहम्॥**

**परोपकारान्विविधान्विधाय तदीयपुण्येन परं प्रयान्ति॥॥**[2]

**न वास्तवं जन्म सतां जगत्यां मृत्युर्नचैषां भवितुं क्षमोऽस्ति॥**

**त्यागः शरीरस्य विधारणा वा लोकोपकाराय मतौ तु तेषाम्॥**[3]

**दशैव तु सदाऽऽचार्यः श्रोत्रियानतिरिच्यते।**

**दशाचार्यानुपाध्याय उपाध्यायान् पिता दश॥**

**पितॄन् दश तु मातैका सर्वां वा पृथिवीमपि।**

**गुरुत्वेनापि भवति नास्ति मातृसमो गुरुः॥**[4]

एताभ्यां श्लोकाभ्यां माता एव सर्वश्रेष्ठा इति प्रतिपादितम्।अतः गुरुः एव परब्रह्म इति वाक्यबलात् च सर्वस्वसमर्पणेन स्वमातुपादाम्बुजं आर्चितव्यम्। ईश्वराराधनेन केवलं नैकानि शुभसाधनानि लब्धुं शक्यन्ते। न तु मातुसेवया प्राप्यमाणः बहूनां योगिनाम् इष्टकामः मोक्षः।

**विश्वेशमाराधयितुं लसन्ति शास्त्रेषु नानाशुभसाधनानि॥**

**सेवा जनन्याः सकलेषु तेषु सर्वोत्तमं साधनमभ्युपेतम्॥**[5]

**धर्मो रक्षति रक्षितः** इति श्रुतेः अस्माभिः धर्माचरणमेव मुख्यात् सर्वदा धर्मम् आचरितव्यम्। तस्य प्रयोजनत्वेन कविना प्रोक्तम्–

**धर्मोहि श्रेयसां मूलं पापं दुःखस्य कारणम्॥**

**धर्मेस्याद्वो मतिर्लोकाः न पापेषु कदाचन॥** [6]

नरेषु बुद्धिमन्तः एव श्रेष्ठाः भवन्ति। बुद्धिरस्यस्ति स बुद्धिमान् इति कथ्यते। स एव विद्वान् इति लोकाचारः। विद्यायां प्राप्तायां स ब्रह्मणं साक्षात्करिष्यति इति प्रसिद्धाः बहव्यः कथाः प्राप्यन्ते। अस्याः एव विद्यायाः महत्त्वविषये कविना उक्तम्–

**भूतले यस्य विद्यायां प्रवृति नैव विद्यते॥**

**निष्फलः संभवस्तस्य यथाजाया गलस्तनौ॥**[7]

---

[2] श्री गोपाल चरितं काव्यम्–2.19

[3] श्री गोपाल चरितं काव्यम्– 2.20

[4] महा.शान्तिपर्वः– 108,16–18

[5] श्री गोपाल चरितं काव्यम्– 3.20

[6] श्री गोपाल चरितं काव्यम्– 5.33

[7] श्री गोपाल चरितं काव्यम्– 6.6

आचार: मनुष्यजीवने बहु प्रभावं जनयति। तेषु संध्यावन्दनरूप नित्यकर्म अन्यतमं भवति। नित्यकर्माणि न आचरयन्ति चेत् उत्पद्यमाना: प्रत्यवाय दोषा: शान्तिमय जीवने बहु व्याघातं जनयन्ति। अत एव कविना समाजमुद्दिश्य नित्यकर्मविषये कथितम्-

**सन्ध्यासु वन्दनं नित्यं कर्तव्यं नियतात्मभि:॥**

**जापश्चैव यथाशक्ति कर्तव्य: शांत मानसै:॥**[8]

असतां दर्शनात् स्पर्शात् संजल्पात् च धर्मचरा: एव प्रहीयन्ते तत्र तु वयं मानवा: अत: किमपि साधयितुं न कर्तव्या दुर्जनसंगति:। यतो हि दुष्टानां संगति: हेया भवति। किञ्च ते नरकं प्रति गमयन्ति। तदेव प्राह-

**दुष्टानां संगतिर्हेया विधेया साधुसंगति:।**

**इमे हि नरक स्वर्गे बीज शास्त्रेषु भाषितम्॥**[9]

इदानींतनकाले समाजस्य पुरुषा: सर्वे स्वार्थमेव चिन्तयन्त: सौत्कर्षं प्रापयितुं स्वजनमपि त्यजन्ति। तदेव प्रकटयितुं कवि: प्राह-

**न कस्यचित्कश्चिदिहास्ति लोके स्नेहो जन: स्वारथ पराहि सर्वे।**

**शक्तं प्रशंसन्ति मुहुर्मुहुर्ये त्यजन्त्यशक्तं स्वजनं त एव॥**[10]

जीवस्य अन्तिमसमये धर्म: एव सहायक: भवति न अन्य: कोऽपि। सर्वप्राणिषु दयां प्रदर्शयन्तु महर्षि वाल्मीकि: दयागुणेनेव ज्ञानी अभवत्। एवं च रन्तिदेव: भगवत: दर्शनं प्राप्तवान्, युधिष्ठिर: भक्तपदं लब्धवान् आसीत्। सज्जनानां सेवया एव श्री नामदेव: भगवन्तं वशीकृतवान् अत: सर्वदा सज्जनानां सेवां कुर्वन्तु इति। दुष्टजनै: साकं संगतिं मा कुरु- सर्वदा सत्यं वद यतो हि सर्वं सत्ये प्रतिष्ठितम् इति महापुरुषाणां जीवनचरित्रपठनेन ज्ञायते- यथा सत्य हरिचंद्र: बलिचक्रवर्ति, भीष्मपितामह:, प्रह्लादय: आदि। एवं चोरकर्म मा कुरु, ब्रह्मचर्यपालनं कुर्वन्तु इति। यथा- लक्ष्मण मारुत: वत्। आपदकाले धृतिं वहन्तु, मद्यपानं मा कुरु, अतिथि सत्कारं कुर्वन्तु, सर्वेभ्य: वस्तुभ्य: गुणग्राही भव। यज्ञयागादि कार्याणां द्वारा परमात्मा शीघ्रं प्रसीदति अत: यज्ञयागादि कार्यान् कुवन्तु। एवं प्रकारेण गोपालदासस्य मुखारविन्दात् अमृतोपदेशम् आकर्ण्य भक्ता: परमसन्तोषमनुभूय साष्टांगनमस्कारन् कृत्वा तत: निष्कान्ता:।

तस्य ध्यानं जीवा: जन्ममृत्यसंसारबन्धनात् मुक्त्यार्थं, मोक्ष प्राप्त्यर्थं च कुर्वन्ति। साकार उपासना नाम मन्दिरे स्थापिता: प्रतिमाया: विधिवत् पूजनम्।

वेदानां अध्ययेन परमपदस्य प्राप्तिर्भवतीति श्रुत्वा कश्चित् जन: अनुरागवसत: पप्रच्छ। यत् केवलं वेदेषु कर्मण: वर्णनं लभ्यते। न तु तत् ब्रह्मप्राप्तये समाधानं तत: मुनिभि: चतुर्णां साधनानां निर्देश: कृत:। तत्तु समादि सम्पत्तय: वैराग्यं मुमुक्षुता विवेकत्वेन कथ्यते। संसारिकभोगस्य परित्याग: वैराग्यम्। तथा विषयेभ्यो: निवर्तनं कृत्वा इष्टेषु स्थापनं राम:। गच्छतां इन्द्रियाणां निरोध: दम:। प्राप्तेषु अनुकूलप्रतिकूलवस्तुषु हर्ष: शोक: च न कुर्यात्। शीतोष्णादि द्वन्दं सहिष्णिता तितिक्षा। विषयानां प्रति नैराश्यभावं प्रदर्श्य चित्तस्य स्थिरता समाधानम्। गुरुपदिष्टेषु वाक्येषु चेतस: भृति श्रद्धा। प्राप्तेषु विषयेषु मनस: रुचि उपरति: सम्पूर्णजगदिदं असत्यमिति मत्वा सद्ब्रह्मचिन्तनं विवेक:। यथा हंस: मिश्रिते दुग्धपानिये दुग्धं विभजते तद्वद् विवेकवान् जन: सदसत: पृथकीकर्तुं शक्नोति।

---

[8] श्री गोपाल चरितं काव्यम्- 6.40

[9] श्री गोपाल चरितं काव्यम्- 6.76

[10] श्री गोपाल चरितं काव्यम्- 14.44

मलविक्षेण आवरणादि दोषै: जीवस्य मन: आवृतं भवति। एतेषां दोषानां परिहार: कर्तव्य:। कर्मोपासना ज्ञानं च एतेषां त्रयानां दोषानां परिहारोपाया: यथा मलिने दर्पणे प्रतिविम्बो न दृश्यते तद्वद् मलिने चेतसि ज्ञानं नोत्पद्यते। इयमपि लोकोक्ति: प्रसिद्धिति यत्– "बुद्धि: कर्मानुसारिणी" अत: कर्मणा मनुष्य: निर्मलं फलं भुक्ते। शास्त्रेषु विविध प्रकारकाणां कर्मणां फलं प्रतिपादतं वर्तते। यथा ब्रह्मचारिणां कृते वेदपाठ, गृहस्थानां कृते यागयज्ञा: कर्तव्य: इति प्रतिपादितम्। तत: परं सत्वगुणस्मर्णानां गनां महत्त्वं प्रतिपादितम्। गोपालनस्य सर्वोत्कृष्टता च समुपवर्णिता वर्तते। दुग्धं तक्रादिकं सात्त्विकत्वात् बुद्धौ अपि सात्त्विकता आयाति। सत्त्वगुण: ज्ञानस्य उत्प्रेरक:। अनेन अवश्यं ज्ञानं प्राप्यते। नरपश्वो: कर्माणि सर्वत्र समानानि। परन्तु विशेषता ज्ञानस्य वर्तते। अनेन प्रकारेण सर्वज्ञ काव्यं पर्यालोच्य संक्षेपेण सुभाषितानि मया लिख्यन्ते।

**सहायकग्रन्थसूची**


1. अमरकोश: भारतीयविद्याप्रकाशनम्, नई दिल्ली
2. अलङ्कारशास्त्रस्येतिहास: – डॉ. जगदीशचन्द्रमिश्र:, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी, 1986
3. अलङ्कारशास्त्रेतिहास: डाँ.जगदीशचन्द्रमिश्र. चौखम्बा सुरभारती प्रकाशन्, वाराणसी, 1999
4. आधुनिकसंस्कृतकाव्यशास्त्रम् – डॉ आनन्दकुमार श्रीवास्तव:,ईष्टर्न बुक् लिकर्स, दिल्ली
5. पाणिनीशिक्षा – पिङ्गलार्यसङ्कलिता, शिक्षाप्रकाश – पञ्जिका सहिता, कलकाता
6. महाभारतम्, वेदव्यास पुने संस्करणम्,1961
7. मेदोनीकोश: भारतीयविद्याप्रकाशनम्, नई दिल्ली
8. रामायणं वाल्मीकि:, गीताप्रेस गोरखपुर, 1999
9. श्री गोपाल चरितं काव्यं, श्री वैष्णव वेदान्ताचार्य स्वामी रामदास, ऋषिपाणि नभोनेत्र, संख्येऽब्दे वैक्रमे परे।
10. संस्कृतसाहित्यस्य इतिहास: – प्रो.हरेकृष्णशतपथी, किताबमहल, कटक –1998